# Yajurvedaprokta Shiva Stuti

# યજુર્વેદપ્રોક્તા શિવસ્તુતિઃ

## Document Information

Text title : Yajurvedaprokta Shiva Stuti

File name : yajurvedaproktAshivastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 22| 61-87||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 16, 2024

*sanskritdocuments.org*

# યજુર્વેદપ્રોક્તા શિવસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
યજુર્વેદ ઉવાચ
અણોરણીયાન્મહતો મહીયા-
નાત્મા ગુહાયાં નિહિતોઽસ્ય જન્તોઃ ।
તમક્રતું પશ્યતિ વીતશોકો
ધાતુઃ પ્રસાદાન્મહિમાનમીશમ્ ॥ ૬૧॥

ઋતં સત્યં પરં બ્રહ્મ પુરુષં કૃષ્ણપિઙ્ગલમ્ ।
ઊર્ધ્વરેતં વિરૂપાક્ષં વિશ્વરૂપં વદામ્યહમ્ ॥ ૬૨॥

હિરણ્યબાહુમીશાનં હિરણ્યપતિમવ્યયમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૬૩॥

અમ્બિકાપતિમવ્યક્તમુમાપતિમનામયમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૬૪॥

રુદ્રં પશુપતિ સ્થાણુમાદ્યન્તરહિતં શિવમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૬૫॥

અનન્તમપ્રતીકારમપરાવૃત્તતેજસમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૬૬॥

આનન્દમયમીશાનમદ્વૈતં નિષ્કલં પ્રભુમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૬૭॥

નિર્ગુણં નિર્મલં શુદ્ધં નિરવદ્યં નિરઞ્જનમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૬૮॥

શાન્તં પ્રસન્નવદનમુમાસંશ્લિષ્ટવિગ્રહમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૬૯॥

ઉગ્રં ભીમં ભવં શર્વં ભક્તસર્વપ્રદં હરમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૭૦॥

મહેશં શઙ્કરં શમ્ભું શરણાગતવત્સલમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૭૧॥

ભગવન્તમુમાકાન્તમનન્તમપરાજિતમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૭૨॥

વિશ્વેશ્વરં મહાદેવં ત્રિયમ્બકમજં શિવમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૭૩॥

ત્રિપુરાન્તકમારાધ્યમારાધકવરપ્રદમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૭૪॥

ત્રિકાગ્નિકાલં સાકરં નિરાકારં સુમઙ્ગલમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૭૫॥

કાલાગ્નિરુદ્રં કામારિં કાલકૂટવિષાદનમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૭૬॥

નીલકણ્ઠં ભસ્મભૂષં સર્વેશ્વરમકલ્મષમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૭૭॥

સદાશિવ શિવાકારં મહાદેવમુમાપતિમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૭૮॥

ઈશાનં સર્વવિદ્યાનાં સર્વવિદ્યાપ્રદં સદા ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૭૯॥

ઈશ્વરં સર્વભૂતાનાં બ્રહ્માધિપતિમક્ષયમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૮૦॥

બ્રહ્મણોઽધિપતિં દેવ પરબ્રહ્મ શિવાત્મકમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૮૧॥

વિશ્વતશ્ચક્ષુષં દેવં વિશ્વતોમુખમવ્યયમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૮૨॥

વિશ્વતો બાહુમવ્યક્તં વિશ્વતઃ પાદમક્ષરમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૮૩॥

સમસ્તહેતુમાશાસ્યં સોમં સોમાર્ધશેખરમ્ ।
ભસ્મ ધૃત્વા લલાટાદૌ ભજધ્વં વૃષભધ્વજમ્ ॥ ૮૪॥

ભજધ્વં શ્રીમહાદેવં ચતુર્વર્ગફલપ્રદમ્ ।
હરિં હરન્તં શ્રીરુદ્રં વિશ્વસ્યેશાનમવ્યયમ્ ॥ ૮૫॥

ભજધ્વં મુનયો નિત્યં ત્યક્ત્વાન્યામરપૂજનમ્ ।
ભ્રમં ત્યક્ત્વા ભવન્તસ્તુ ભવાનીરમણં પ્રભું ॥ ૮૬॥

ભગવન્તં ભવારાતિં ભજધ્વમભયપ્રદમ્ ॥ ૮૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે યજુર્વેદપ્રોક્તા શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૨। ૬૧-૮૭॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 22 . 61-87..

Proofread by Ruma Dewan

*Yajurvedaprokta Shiva Stuti*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*